# केरलपाठावलिः

# संस्कृतम्

## षष्ठी कक्ष्या

अक्कादमिक-संस्कृतविद्यालयानां कृते

# KERALA READER SANSKRIT

## STANDARD VI

For Academic and Sanskrit Schools

Government of Kerala
Department of Education

KT 309-1/Sanskrit 6 AS

## राष्ट्रगीतम्

जनगण मन अधिनायक जय हे,
भारत भाग्यविधाता।
पंजाब सिंध गुजरात मराठा,
द्राविड़ उत्कल बंगा,
विंध्य हिमाचल यमुना गंगा,
उच्छलजलधि तरंगा।
तव शुभ नामे जागे,
तव शुभ आशिष माँगे,
गाहे तव- जय गाथा।
जनगण मंगलदायक जय हे,
भारत भाग्यविधाता।
जय हे जय हे जय हे
जय जय जय जय हे

## प्रतिज्ञा

भारतं मम राष्ट्रम्। सर्वे भारतीयाः मे भ्रातरः। अहं मम राष्ट्रे स्निह्यामि। तस्य समृद्धायां नानाविधायां च पूर्विकसम्पत्तौ अभिमानी च भवामि। तद्योग्यतां सम्पादयितुं सदा यतिष्ये च।

अहं पितरौ गुरूंश्चादरिष्ये, बहुमानयिष्ये च। विनयान्वित एवाहं सदा सर्वैः सह व्यवहरिष्ये, सर्वेषु प्राणिषु दयालुर्वर्तिष्ये च।

मम राष्ट्राय राष्ट्रियेभ्यश्चाहं समर्पये स्वसेवाम्। राष्ट्रियाणां योगक्षेमैश्वर्येष्वेवाहम् आत्मनस्तोषं कलयामि।

**State Council of Educational Research and Training (SCERT)**
Poojappura, Thiruvananthapuram 695012, Kerala
Website: www.scertkerala.gov.in
email: scertkerala@gmail.com
Phone:0471-2341883, fax;0471-231869
Typesetting and Layout: SCERT
First Edition : 2015, Reprint : 2016
Printed at : KBPS, Kakkanad, Kochi-30
Department of Education, Government of Kerala

# भूमिका

प्रियच्छात्र!

प्रवर्तनाधिष्ठिता छात्रकेन्द्रीकृता च भवति अस्माकं पाठ्यपद्धतिः। तदनुसृत्य छात्राणां सर्वतोमुखविकासं लक्ष्यीकृत्य पाठ्यक्रमः स्वीकृतः अस्ति। पाठ्यक्रमे अद्वितीयं भवति पाठपुस्तकम्। भाषापराणां नैपुणीनां विकासाय स्वयं पठनाय च पाठपुस्तकम् उपकरोति।

विविधव्यवहाररूपाणां परिचायनाय पुस्तकेऽस्मिन् पठनसन्दर्भाः आयोजिताः वर्तन्ते। पठितानाम् आशयानां प्रबलीकरणाय नूतनसन्दर्भेषु प्रयोगाय स्वयंमूल्यनिर्णयाय च अवसराः यथायोग्यं दत्ताः।

भाषापठनम् अनायासं सुखप्रदं च कर्तुं पाठपुस्तकमिदं प्रयोजकमिति चिन्तयामि। वर्णमनोहराणि चित्राणि छात्रमनांसि आकर्षन्ति नूनम्। संस्कृतपठनं सर्वथा मधुरं सफलं च भवतु इति आशासे।

**डा॰ पि ए फात्तिमा**

निदेशकः

राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद्, केरलाः



## TEXT BOOK DEVELOPMENT COMMITTEE

SANSKRIT STANDARD VI

### PARTICIPANTS

1. **P.Ramesan Nambeesan,** Govt. H.S Chaliappuram, Malappuram
2. **K.R. Ramachandran**, AUPS, Muriyad, Irinjalakkuda, Thrissur
3. **Biju.P**, Chemanthiri AUPS, Koyilandi, Kozhikode
4. **Ajimon C.P**, Govt UPS, Kavanad, Kollam
5. **Rajeesh K.V**, GVUPS, Kuttikkattukara, Ernakulam
6. **Kiran Kumar.R,** GMUPS Elattil, Kozhikode
7. **Raju.K,** Govt Senior Basic School, Soorambail, Kumbala, Kasaragod
8. **S.Unnikrishnan Nair**, BRC Trainer (Rtd,) Charippurathu Plavila Veedu, Edackidom

   Kollam

### ARTISTS

1. **Rajeevan Parayil**, H.S Azhikkode , Kannur
2. **Varghese Kalathil,** G.H.S.S Pallikkunnu, Kannur
3. **Balakrishnan Achary.P.G**, Lecturer (Rtd.) D.I.E.T, Puthuparambil, Kottayam

### EXPERTS

1. **Dr. Sahadevan.G,** Prof. (Rtd.) University College, Thiruvananathapuram
2. **Madhavan Pillai. V**, Associate Professor in Sanskrit (Rtd.) Govt. College for Women.
3. **Dr. Mohandas.K**, Sr. Lecturer (Rtd.) M.G. University College of Teacher Education, Muvattupuzha.

### ADVISOR

1. **Dr. Vasudevan Potti**, Professor (Rtd), Govt. Sanskrit College, Thiruvananthapuram

### ACADEMIC CO ORDINATOR

**Dr.Shameeja.P**

Research Officer (Sanskrit) SCERT


राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद्, केरलाः

**STATE COUNCIL OF EDUCATIONAI AND TRAINING, KERALA**

Poojappura, Thiruvananthapuram - 695 012, Kerala.

| क्रमसंख्या | विषयानुक्रमणिका | पुटसंख्या |
|---|---|---|
| | **एककम्-१- देशस्नेहः** | |
| १. | मामकदेशः (कविता) | ७ |
| २. | देशरक्षा परमो धर्मः (कथा) | १० |
| | **एककम्-२-संस्कृतिः** | |
| ३. | स्वास्थ्यमस्तु नः (सम्भाषणम्) | १७ |
| ४. | नाम किं वद (प्रहेलिका) | २३ |
| ५. | नीतिबोधः (सचित्रकथा) | २६ |
| | **एककम्-३- ज्ञानदर्पणः** | |
| ६. | विदुरवचनम् (काव्यम्) | ३६ |
| ७. | शास्त्रोपासकः अच्युतपिषारटिः (जीवनचरितम्) | ४३ |
| ८. | पठनयात्रा (सम्भाषणम्) | ४९ |
| | **एककम्-४-साधुभाषितम्** | |
| ९. | गीतामृतम् (भगवद्गीता) | ५९ |
| १०. | सिंहः सिंह एव (पञ्चतन्त्रकथा) | ६७ |
| ११ | .सुभाषितानि | ७२ |

प्रथमम् एककम्।

# देशस्नेहः

*'जननी जन्मभूमिश्च स्वर्गादपि गरीयसी' इति प्रसिद्धम् वचनम्। स्वदेशस्य अनुपमं चरित्रं स्वमातुः अनुपमः स्नेहश्च कस्य वा न आनन्ददायकः भवति।*

*देशस्य रक्षायै भवान् किं किं कर्तुं प्रभवति ? एककमिदं पठतु।*

**पठनाधिगमाः**

* कविता तालसमेतम् आलपति।
* आशयं वदति लिखति च।
* कवितां परिवर्त्य लिखति।
* कथां वाचयति।
* कथां पठित्वा आशयं वदति लिखति च।
* ल्यबन्ताव्ययानि पठति।
* समस्तपदं जानाति।



प्रथमः पाठः

# मामकदेशः

भारतदेशो मामकदेशः
सुन्दरदेशोऽयम्।
पुण्यपुरातनसंस्कृतिधारा
प्रवहत्यनवरतम्।।

स्नेहस्त्यागः शौर्यं धर्मो
दानं भूतदया।
भारतदेशे जीवनविजये
एते ह्याधाराः।।

भिन्नो वेषो भिन्ना भाषा
भिन्नं रूपमपि।
तथापि सर्वो भारतदेशे
निवसत्येकमनाः।।

पदच्छेदः-

| | | | | |
|---|---|---|---|---|
| सुन्दरदेशोऽयं | - | सुन्दरदेशः | + | अयम्। |
| प्रवहत्यनवरतम् | - | प्रवहति | + | अनवरतम्। |
| स्नेहस्त्यागः | - | स्नेहः | + | त्यागः। |
| धर्मो दानम् | - | धर्मः | + | दानम्। |
| ह्याधारा | - | हि | + | आधाराः। |
| भिन्नो वेषो | - | भिन्नः | + | वेषः। |
| तथापि | - | तथा | + | अपि। |
| निवसत्येकमनाः | - | निवसति | + | एकमनाः। |

**विग्रहः**

शौर्यम् - शूरस्य भावः।

## पठनप्रवर्तनानि



**कवितां सतालम् आलपतु।**

*श्रद्धेयाः अंशाः-* उचितः तालः।
अक्षरस्फुटता।
आशयावबोधः।



**अधो रेखाङ्कितपदानां समानाशययुक्तपदानि उपयुज्य कवितां परिवर्त्य लिखतु।**

भारतदेशो मामकदेशः सुन्दरदेशोऽयम्।
पुण्यपुरातनसंस्कृतिधारा प्रवहत्यनवरतम्।।

*श्रद्धेयाः अंशाः*　　उचितः पदप्रयोगः।

आशयपूर्णता।

रचनासामर्थ्यम्।



### अधो दत्तम् आशयं पठित्वा समानाशयपङ्क्तीः चिनोतु।

संस्कृतभाषा पुरातनभाषा भवति।

स्नेहः , त्यागः, शौर्यम्  इत्यादयः आधाराः भवन्ति।

अस्माकं देशे भाषाणां वेषाणां च वैविध्यमस्ति।

*श्रद्धेयौ अंशौ* :-　　उचितपदचयनम्।

आशयावबोधः।



### कवितायाः आशयं पञ्चभिर्वाक्यैः लिखतु।

सूचनाः-

भारतदेशः............. पुण्यपुरातनं .......... स्नेहः ....... त्यागः, जीवनविजयः........ भिन्ना भाषा....... निवसन्ति ।

श्रद्धेयौ अंशौ :-　　आशयावबोधः।

वाक्यघटना।

द्वितीयः पाठः

# देशरक्षा परमो धर्मः



पुरा काश्मीरेषु नन्दिनीदेवी नामिका काचित् ग्रामीणा वसति स्म। तस्याः चत्वारः पुत्राः आसन्। सर्वेषां विद्याभ्यासादिकं विधिवत् निरुह्य सा परिवारं पालयति स्म।

कालान्तरे राज्यसीमायां कलहः सञ्जातः। सीमारक्षणाय सैनिकानां दौर्लभ्यम् अभवत्। अतः ग्राममुख्यः ग्रामीणान् एवमवदत्- "भोः! देशस्यैषा दुर्दशा। उपाय एक एव। भवन्तः एकैकं युवानम् अवश्यं देशरक्षायै प्रेषयन्तु" इति।



मुख्यस्यादेशानुसारं नन्दिनीदेवी ज्येष्ठं तनयं प्रैषयत्। एवमेव सर्वाभिः कृतम्। तथापि जनबलेन देशरक्षा अपूर्णाऽभवत्। अतः सा शिष्टान् पुत्रान् आहूय अवदत्- "पुत्राः! देशरक्षणम् अस्माकं धर्मः। अतः तदेव कार्यं स्वीकुरुत" इति।

मातुराज्ञया क्रमेण एकैकः सीमां प्राप्य देशरक्षणकर्मसु व्यापृतः अभवत्। सैनिकानाम् अपर्याप्ततया ग्राममुख्यः पुनरपि ग्रामीणान् सीमारक्षणाय उद्बोधितवान्। श्रुत्वैतत् नन्दिनीदेवी रोदितुम् आरभत। तदा काचित् तामुपगम्य रोदनकारणमपृच्छत्। "देशरक्षा परमो धर्मः। इतः परं प्रेषयितुं पञ्चमः पुत्रो नास्तीति मे दुःखम्" इति दृढमनसा नन्दिनीदेवी न्यवेदयत्।

"जननी जन्मभूमिश्च स्वर्गादपि गरीयसी"।

**पदच्छेदः-**

पुनरपि - पुनः + अपि।

श्रुत्वैतत् - श्रुत्वा + एतत्।

तामुपगम्य - ताम् + उपगम्य

रोदनकारणमपृच्छत् - रोदनकारणम् + अपृच्छत्।

**विग्रहः-**

ग्रामीणान् - ग्रामे भवः ग्रामीणः, तान्।

दौर्लभ्यम् - दुःखेन लब्धुं शक्यं दुर्लभं, तस्य भावः।

राज्यसीमायाम् - राज्यस्य सीमा राज्यसीमा, तस्याम् ।

दुर्दशा - दुष्टा दशा।

श्रेयस्करम् - श्रेयः करोति इति श्रेयस्करम्।

**व्याकरणविशेषः**

वसति स्म- स्म योगे भूतार्थे 'लट् स्मे' इति सूत्रम् (वर्तमानकालक्रियापदानां स्म इत्यस्य योगेन भूतकालार्थं लभते)।

**धातुरूपाणि-**

आसन् - अस् धातुः लङ् प.प. प्र.पु ब.व।

अभवत् - भू धातुः लङ् प.प. प्र.पु ए.व।

अवदत् - वद् धातुः लङ् प.प. प्र.पु ए.व।

**अव्ययानि।**

निरुह्य - ल्यबन्तम् अव्ययम्- पूर्तीकृत्य।

आहूय - ल्यबन्तम् अव्ययम्- आह्वानं कृत्वा।

रोदितुम् - तुमुन्नन्तम् अव्ययम्- रोदनं कर्तुम्।

उपगम्य - ल्यबन्तम् अव्ययम्- समीपं गत्वा ।

## पठनप्रवर्तनानि।



### पाठभागं सस्वरं वाचयतु।

श्रद्धेयाः अंशाः :-

वाचनसामर्थ्यम्।

उच्चैः वाचनम्।

आशयावगमः।



### कथास्तम्भं क्रमीकरोतु।

१. पुनरपि आवश्यकतां ज्ञात्वा सा शिष्टान् पुत्रानपि प्रेषितवती।

२. प्रतिगृहम् एकैकं युवानं देशरक्षार्थं प्रेषयन्तु इति ग्राममुख्यः अवदत्।

३. काचित् ग्रामीणा पुत्रचतुष्टयेन सह ससुखं वसति स्म।

४. इतोऽपि प्रेषयितुं मम पुत्रो नास्ति।

५. एकदा राज्यसीमायां कलहोऽभवत्।

६. ग्राममुख्यस्य आदेशं श्रुत्वा सा प्रथमं पुत्रं तदर्थं प्रैषयत्।

श्रद्धेयौ अंशौ :-

उचितं क्रमीकरणम्।

आशयव्यक्तता।



### समानाशयकथाः सञ्चित्य कक्ष्यायाम् अवतारयतु।

*श्रद्धेयाः अंशाः :-* आशयग्रहणम्।

अवतारणसामर्थ्यम्।


भावात्मकता।



**उदाहरणानुसारं क्रियापदं परिवर्त्य लिखतु।**

| | क्रियापदानि | क्तवतु प्रत्ययान्तः पुल्लिङ्गः | क्तवतु प्रत्ययान्तः स्त्रीलिङ्गः |
|---|---|---|---|
| उदा- | अगच्छत् | गतवान् | गतवती। |
| | अपतत् | पतितवान् | पतितवती। |
| | अधावत् | .......... | ..........। |
| | अलिखत् | .......... | ..........। |
| | अपालयत् | ........... | ...........। |

*श्रद्धेयौ अंशौ-* क्रियापदज्ञानम्।
पदविवेचनम्।



**कथां कक्ष्यायाम् अवतारयतु।**

श्रद्धेयाः अंशाः -आशयव्यक्तता।
कथापरिज्ञानम्।
भावात्मकता।

# शब्दकोशः

| पदम् | संस्कृतम् | कैरली | कन्नडम् | आङ्गलम् |
|---|---|---|---|---|
| उपगम्य | समेत्य | അടുത്തു ചെന്നിട്ട് | ಹತ್ತಿರ ಹೋಗಿ | reached |
| काचित् | काचन | ഏതോ ഒരുവൾ | ಯಾವಳೋ ಒಬ್ಬಳು | one |
| गरीयसी | महनीया | ശ്രേഷ്ഠതമയായ | ಹಿರಿದಾದುದು | great |
| तनयम् | पुत्रम् | പുത്രനെ | ಮಗನನ್ನು | son |
| दृढमनसा | दृढचित्तेन | ഉറച്ചമനസ്സോടെ | ಗಟ್ಟಿಮನಸ್ಸಿನಿಂದ | with strong mind |
| न्यवेदयत् | व्यजिज्ञपत् | അറിയിച്ചു | ನಿವೇದಿಸಿ ಕೊಂಡನು, ಳು | acknowledge |
| निरुह्य | पूर्तीकृत्य | പൂർത്തീകരിച്ചിട്ട് | ನಿರ್ವಹಿಸಿ | having completed |
| प्रवहति | वहति, सरति | ഒഴുകുന്നു | ಹರಿಯುತ್ತದೆ | flows |
| पालयति स्म | संरक्षति स्म | പരിപാലിച്ചിരുന്നു | ಪಾಲಿಸುತ್ತಿದ್ದನು,ಳು | protected |
| प्रैषयत् | प्रेषयामास | അയച്ചു | ಕಳುಹಿಸಿದನು, ಳು | sent |
| मामकम् | मम | എന്റെ | ನನ್ನ | mine |
| व्यापृतः | निमग्नः | മുഴുകിയവൻ | ವ್ಯಾಪಿಸಿದ | indulged |
| शौर्यम् | शूरता | ശൗര്യം | ಶೌರ್ಯವನ್ನು | valiance |
| श्रेयस्करम् | ऐश्वर्यदायकम् | ഐശ്വര്യകരമായത് | ಶ್ರೇಯಸ್ಕರವಾದುದು | prosperous |
| सीमारक्षणम् | मर्यादासंरक्षणम् | അതിർത്തിസംരക്ഷണം | ಗಡಿರಕ್ಷಣೆ | border security |
| संस्कृतिः | संस्कारः | സംസ്കാരം | ಸಂಸ್ಕೃತಿ | culture |

# किमधिगतम्

निर्देशाः- प्रवर्तनानि यथाकालं कृतानि चेत् साधुसूचकचिह्नं (√) क्रियताम्

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेशः निर्देशः | परिहारबोधनम्* (संख्यया सूचितम्) |
|---|---|---|---|---|---|
| १. | कविता सतालम् आलपिता। | | | | |
| २. | कवितायाः आशयः लिखितः। | | | | |
| ३. | कविता परिवर्त्य लिखिता। | | | | |
| ४. | कथास्तम्भः क्रमीकृतः। | | | | |
| ५. | कथाः सञ्चित्य अवतारिताः। | | | | |
| ६. | क्रियापदपरिवर्तनं कृतम्। | | | | |
| ७. | कथा कक्ष्यायाम् अवतारिता। | | | | |

*
१. अध्यापकस्य साहाय्येन। २. सुहृदः साहाय्येन। ३. अन्येषां साहाय्येन।

द्वितीयम् एककम्

# संस्कृतिः

स्वास्थ्यमेव धनं महत्। हितभोजनेन, हितकर्मणा, हितविनोदेन च तत्साध्यम्।

स्वास्थ्यसंरक्षणाय अस्माभिः किं किं करणीयम्? एककमिदं पठतु।

**पठनाधिगमाः**

* *उच्चारणशुद्ध्या आशयव्यक्ततया च उच्चैः वाचनं करोति।*
* *पादटिप्पणीं लिखति।*
* *पट्टिकां करोति।*
* *प्रहेलिकाः पठति आशयमवगच्छति च।*
* *मातृभाषायाः प्रहेलिकाः अनूद्य लिखति।*
* *चित्रकथां निरीक्ष्य आशयं विशदीकरोति।*
* *कथास्तम्भं क्रमीकरोति।*
* *चित्रं निरीक्ष्य कथां लिखति।*

## तृतीयः पाठः


# स्वास्थ्यमस्तु नः




"भोः महाशय! शीघ्रम् औषधं यच्छतु। मम उदरवेदना असह्या एव"।

"भोः महाशय! मम पुत्रस्य भक्षणकार्ये निष्ठा नास्त्येव। कदापि मितत्वं न पालयति। बुभुक्षितः सः कदाचित् हस्तप्रक्षालनं विनापि भोजनं करोति"।

"हे बालक! भक्षणकार्ये नियन्त्रणं शुचित्वं च आवश्यकम्। अन्नदोषः बहूनां रोगाणां कारणं भवति। अतः अमितम् अहितम् अनावृतं च भक्षणं त्याज्यम्।"




**व्यायामो हि सदा पथ्यो**

**बालानां स्निग्धभोजिनाम्।**

**स च शीते वसन्ते च**

**तेषां पथ्यतमः स्मृतः ।।**

**-महाभारतम्**

**पदच्छेदः-**

स्वास्थ्यमस्तु - स्वास्थ्यम् + अस्तु।

नास्त्येव - न + अस्ति + एव।


कदापि - कदा+ अपि।

विनापि - विना + अपि।

व्यायामो हि - व्यायामः + हि।

स च - सः + च।

## पठनप्रवर्तनानि



**पाठभागं पठित्वा भावानुकरणकेलीरीत्या कक्ष्यायाम् अवतारयतु।**



**पाठभागस्थान् आशयान् संयोज्य एकं विज्ञापनपत्रं सज्जीकृत्य विद्यालये प्रदर्शयतु।**



**अधोलिखितवाक्यानि पठित्वा किम् उचितम् किम् अनुचितम् इत्येवं पट्टिकां करोतु।**

* दन्तधावनं करोमि।
* मालिन्यानि नद्यां निक्षिपामि।
* योगासनं करोमि।
* प्रतिदिनं स्नानं न करोमि।
* अनावृतं भक्षणं खादामि।
* परिस्थितिं संरक्षामि।
* शुद्धवस्त्राणि धरामि।

| उचितम् | अनुचितम् |
|---|---|
| | |
| | |
| | |
| | |



अधोदत्तचित्राणाम् उचितं पादटिप्पणिं कोष्ठकात् चित्वा लिखतु।



. . . . . . . . . . . . . . . . . . . . . . . . . . . .





. . . . . . . . . . . . . . . . . . . . . . . . . . . .

. . . . . . . . . . . . . . . . . . . . . . . . . . . .

आसनं गात्रसौख्याय। स्वच्छं गृहाङ्कणम्।स्नानं शरीरशुद्धये।

*श्रद्धेयाः अंशाः :-* निरीक्षणम्।

आशयग्रहणम्।

उचितटिप्पणीचयनम्।



**अन्नदोषम् अधिकृत्य चर्चां कृत्वा टिप्पणीं लिखतु।**

*श्रद्धेयाः अंशाः :-* विषयबोधः।


अवतरणसामर्थ्यम्।


टिप्पणीलेखनसामर्थ्यम्।

चतुर्थः पाठः

# नाम किं वद

शिरो न दृश्यते स्थाने
दृश्यते गमने हि तत्।
जलस्थलनिवासी च
कवची कोऽयमुच्यताम्।।






नरो नाहं खगो नाहं
द्विनेत्री च द्विपादपि।
नेत्रयोः मित्रमेवाहं
नाम किं वद सत्वरम्।।

वर्षादौ या समागत्य
गच्छत्यन्ते यथाविधि।
ज्ञापयन्ति दिनाङ्कांश्च
केयं वदतु साम्प्रतम्।।



## पठनप्रवर्तनानि




**प्रहेलिकाः पठित्वा उत्तरं वदतु।**



**प्रहेलिकानां चयनं करोतु।**



**चित्राणाम् अधः उचिताः प्रहेलिकाः लिखतु।**



. . . . . . . . . . . . . . . . . . . .



. . . . . . . . . . . . . . . . . . . .



. . . . . . . . . . . . . . . . . . . .



. . . . . . . . . . . . . . . . . . . .



. . . . . . . . . . . . . . . . . . . .

एककूप्यां तैलद्वयम्। अङ्कणमञ्जूषा निरावरणा। ऋषभश्शेते रज्जुर्धावति।
सहस्रपुत्राणां नूपुरमेकम्। स्पृशन्तं दहति।

२. **पदच्छेदः**

कः + अयम् - कोऽयम्।

द्विपात् + अपि - द्विपादपि।

मित्रम् + एव + अहम् - मित्रमेवाहम्।

गच्छति + अन्ते - गच्छत्यन्ते।

खगः + अपि - खगोऽपि।

३. दृश्यते - दृश् धातु आत्मनेपदि कर्मणि लट्, प्र.पु. ए.व।

| | | |
|---|---|---|
| दृश्यते | दृश्येते | दृश्यन्ते। |
| दृश्यसे | दृश्येथे | दृश्यध्वे |
| दृश्ये | दृश्यावहे | दृश्यामहे। |

पञ्चमः पाठः

# नीतिबोधः



कश्चित् चीनसञ्चारी पाटलीपुत्रम् आगच्छत्। चन्द्रगुप्तः तदानीं तत्र राजा आसीत्। सञ्चारी तेन सह मिलितवान्।

"महाराज! भवतः विजयकथा विदेशेष्वपि प्रसृता वर्तते। विजयरहस्यं ज्ञातुमिच्छामि"।

"न तथा किमपि रहस्यम्। महामन्त्री चाणक्य एव साम्राज्यस्यास्य शिल्पी"।

सः चाणक्यं द्रष्टुं भटैः सह प्रस्थितवान्। भटाः गङ्गातीरस्थं चाणक्यकुटीरम् अदर्शयन्।

"वन्दनं महात्मन्। चीनसञ्चारी एष भवन्तं द्रष्टुमागतः"।

स्वभवने दीपसम्मुखे किमपि लिखन् चाणक्यः





झटिति ज्वलन्तं दीपं निर्वाप्य भवनस्य अन्तः अगच्छत्।



क्षणानन्तरम् दीपमन्यं गृहीत्वा बहिरागतः च।

"उपविशतु भवान् । किमपेक्षते?"

"महाशय! दीपः किमर्थं परिवर्तितो भवता। ज्ञातुम् उत्सुकोऽहम्"।

"मित्र! भवदागमनकाले राजकार्ये मग्नः आसम्।

राजधनस्य व्ययेन ज्वलितः स दीपः। भवता सह मेलनं मे व्यक्तिगतं कार्यम्। एष दीपस्तु मम व्ययेन ज्वालितः। कदापि राजधनस्य दुरुपयोगं न करोमि" ।

चाणक्यस्य नीतिबोधं विज्ञाय सञ्चारी तस्य पुरतः नम्रशिरस्कः अभवत् ।

**पदच्छेदः-**

| | | |
|---|---|---|
| विदेशेष्वपि | - | विदेशेषु + अपि। |
| ज्ञातुमिच्छामि | - | ज्ञातुम् + इच्छामि। |
| उत्सुकोऽहम् | - | उत्सुकः + अहम्। |
| दीपस्तु | - | दीपः + तु। |

**विग्रहवाक्यानि**

शिल्पी - शिल्पं निर्मातुं शीलमस्यास्तीति।

महाराजः - महान् च असौ राजा च।

**व्याकरणकार्याणि-**

सहार्थशब्दयोगे तृतीया

उदा- माता पुत्रेण सह विद्यालयं गच्छति।

(सह, समं, साकं, सार्धं, सहितं, एभिर्योगे तृतीया स्यात्)

## पठनप्रवर्तनानि



**कथास्तम्भं क्रमीकरोतु।**

क. भटाः गङ्गातीरस्थं चाणक्यकुटीरम् अदर्शयन्।

ख. कश्चित् चीनसञ्चारी चन्द्रगुप्तं द्रष्टुं पाटलीपुत्रम् आगच्छत्।

ग. चाणक्यस्य नीतिबोधं विज्ञाय सञ्चारी नम्रशिरस्कः अभवत्।

घ. सञ्चारी चाणक्यं द्रष्टुं भटैः सह प्रस्थितवान्।




1



2



3



4



5



6

- काकी अन्नमाहर्तुम् अगच्छत्।
- सञ्जातपक्षः पिकपोतः काकनीडं त्यक्त्वा अन्यत्र अगच्छत्।
- काकी स्वनीडे अण्डद्वयं निक्षिपति स्म।
- ततः काकी अण्डेभ्यः जातान् शावकान् संवर्धयत्।
- तदा एव काचित् कोकिला आगत्य काकनीडे अण्डमेकं निक्षिप्तवती।
- काकी सर्वाणि अण्डानि पर्यपालयत्।

२. **चित्रं निरीक्ष्य कथां लिखतु।**

***श्रद्धेयाः अंशाः-*** चित्रनिरीक्षणम्।

आशयग्रहणम्।

उचितवाक्यघटना।



**कोष्ठकात् उचितं पदं स्वीकृत्य उदाहरणानुसारं क्रियारूपाणि चित्वा लिखतु।**

(अदर्शयत्,  अभवत्,  अमिलत्)

| वर्तमानकालः/लट् | भूतकालः/लङ् |
|---|---|
| दर्शयति | अदर्शयत् |
| मिलति | . . . . . . . . . . . . . . |
| भवति | . . . . . . . . . . . . . . |

*श्रद्धेयाः अंशाः*  लकारपरिज्ञानम्।
अर्थग्रहणम्।
उचितपदलेखनम्।



**पदसूर्यं निरीक्ष्य उदाहरणानुसारं वाक्यानि रचयतु।**

लता सोदरेण सह पुष्पाणि चिनोति।




*श्रद्धेयाः अंशाः* अव्ययस्य प्रयोगज्ञानम्।
आशयग्रहणम्।
उचितवाक्यरचना।

**क्रियापदानि**

अगच्छत् - गम् धातु प.प ,लङ् प्र.पु. ए. व।
वर्तते - वृतु वर्तने आ प.लट् प्र.पु. ए.व।
अदर्शयन् - दृश् (णिजन्तम्) धातु प.प, लङ् प्र.पु ब.व।
आसन् - अस् धातु प.प लङ् प्र.पु ब.व।

वृतु वर्तने आत्मनेपदि लट् लकारः।

| | ए.व | द्वि.व | ब.व |
|---|---|---|---|
| प्र.पु. | वर्तते | वर्तेते | वर्तन्ते। |
| म.पु | वर्तसे | वर्तेथे | वर्तध्वे। |
| उ.पु | वर्ते | वर्तावहे | वर्तामहे। |

अस् धातुः लङ् लकारः।

| | ए.व | द्वि.व | ब.व |
|---|---|---|---|
| प्र.पु | आसीत् | आस्तां | आसन्। |
| म.पु | आसीः | आस्तां | आस्त |
| उ.पु | आसम् | आस्व | आस्म। |

# किमधिगतम्

निर्देशाः- प्रवर्तनानि यथाकालं कृतानि चेत् साधुसूचकचिह्नं (√) क्रियताम्

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेशः निर्देशः | परिहारबोधनम्* (संख्यया सूचितम्) |
|---|---|---|---|---|---|
| १. | विज्ञापनपत्रं सज्जीकृतम्। | | | | |
| २. | अन्नदोषं अधिकृत्य टिप्पणी लिखिता। | | | | |
| ३. | प्रहेलिकायाः उत्तरं लिखितम्। | | | | |
| ४. | चित्रं दृष्ट्वा प्रहेलिका लिखिता। | | | | |
| ५. | कथास्तम्भः क्रमीकृतः। | | | | |
| ६. | चित्रं निरीक्ष्य कथा लिखिता। | | | | |
| ७. | पदसूर्यं निरीक्ष्य वाक्यानि रचितानि। | | | | |

*
१. अध्यापकस्य साहाय्येन। २. सुहृदः साहाय्येन। ३. अन्येषां साहाय्येन।

# शब्दकोशः

| पदम् | संस्कृतम् | कैरली | कन्नडम् | आङ्गलम् |
|---|---|---|---|---|
| अनमत् | प्रणाममकरोत् | നമിച്ചു | ನಮಿಸಿದನು,ಳು | bowed |
| अनावृतम् | आवरणेन विना | മൂടിവയ്ക്കാത്തത് | ಮುಚ್ಚದಿರುವ | having not covered |
| अन्नदोषः | भक्षणदोषः | ഭക്ഷണദോഷം | ಆಹಾರದೋಷ | demerits of food |
| अमितम् | अत्यधिकम् | അളവിൽ കൂടുതൽ | ಅತಿಯಾದ | A lot of |
| असह्या | सोढुमशक्या | സഹിക്കാൻ പറ്റാത്ത | ಸಹಿಸಲಾಗದ | intolerable |
| अहितम् | न हितम् | ഉചിതമല്ലാത്ത | ಹಿತವಲ್ಲದ | not proper |
| औषधम् | भेषजम् | മരുന്ന് | ಔಷಧ | medicine |
| उच्यताम् | कथ्यताम् | പറഞ്ഞാലും | ಹೇಳಲ್ಪಡಲಿ | please tell |
| उदरवेदना | उदरपीडा | വയറുവേദന | ಹೊಟ್ಟೆ ನೋವು | stomach ache |
| कुटीरम् | घोषः | കുടിൽ | ಗುಡಿಸಲು | hut |
| खगः | पक्षी | പക്ഷി | ಪಕ್ಷಿ | bird |
| ज्वलन्तम् | भासन्तम् | ജ്വലിക്കുന്ന | ಉರಿಯುತ್ತಿರುವ | burning |
| झटिति | शीघ्रम् | പെട്ടെന്ന് | ಕೂಡಲೇ | quickly |
| त्याज्यम् | उपेक्ष्यम् | ഒഴിവാക്കേണ്ടത് | ತ್ಯಾಜ್ಯ | to be given |
| दिनाङ्कः | तिथिः | തീയതി | ದಿನಾಂಕ,ತಾರೀಕು | date |
| दृश्यते | अवलोक्यते | കാണുന്ന | ಕಾಣುತ್ತದೆ | seeing |
| द्रष्टुम् | ईक्षितुम् | കാണുന്നതിന് | ನೋಡಲು | to see |

| | | | | |
|---|---|---|---|---|
| नम्रशिरस्कः | अवनतशीर्षः | തലകുനിച്ചവൻ | ತಲೆ ಬಾಗಿದವನು | One who has bowed his head |
| नयनम् | नेत्रम् | കണ്ണ് | ಕಣ್ಣು | eye |
| नरः | मनुष्यः | മനുഷ്യൻ | ಮಾನವ | man |
| निर्वाप्य | निर्वापनं कृत्वा | അണച്ചിട്ട് | ಆರಿಸಿ, ನಂದಿಸಿ | turn off |
| निष्ठा | कृत्यता | കൃത്യത | ನಿಷ್ಠೆ | accuracy |
| पथ्यः | उचितः | ഉചിതമായ | ಪಥ್ಯ, ಹಿತಕರ | proper |
| प्रसृता | व्याप्ता | വ്യാപിച്ച | ವ್ಯಾಪಿಸಿದ | spread |
| मितत्वम् | मितभावः | മിതം | ಮಿತವಾದ | limit |
| मित्रम् | सुहृत् | കൂട്ടുകാരൻ | ಗೆಳೆಯ,ಮಿತ್ರ | friend |
| यच्छतु | ददातु | തരൂ | ಕೊಡಲಿ,ನೀಡಲಿ | give |
| वर्षादौ | वर्षारम्भे | വർഷത്തിന്റെ ആദ്യം | ವರ್ಷದ ಮೊದಲಲ್ಲಿ | in the begining of the year |
| राजा | शासकः | രാജാവ് | ರಾಜನು | King |
| शीघ्रम् | वेगेन | വേഗത്തിൽ | ಬೇಗನ | quickly |
| सत्वरम् | शीघ्रम् | പെട്ടെന്ന് | ಕೂಡಲೇ | at once |
| साम्प्रतम् | अधुना | ഇപ്പോൾ | ಈಗ | now |
| स्वास्थ्यम् | स्वस्थावस्था | ആരോഗ്യം | ಆರೋಗ್ಯ | wellbeing |
| हस्तप्रक्षालनम् | करशुचीकरणम् | കൈകഴുകൽ | ಕೈ ತೊಳೆಯುವಿಕೆ | hand washing |
| ज्ञातुम् | अवगन्तुम् | അറിയുന്നതിന് | ತಿಳಿಯಲು | to know |
| ज्ञापयन्ति | बोधयन्ति | അറിയിക്കുന്നു | ನೆನಪಿಸುತ್ತಾರೆ | to inform |

एककम्- ३

# ज्ञानदर्पणः

**महाज्ञानिनां जन्मना पावितोऽयं देशः। व्यासभासकालिदासप्रभृतयः पुण्यपुरातने अस्मिन् देशे एव लब्धजन्मानः भवन्ति। महात्मनां चरितं महद्वचांसि च शृणुमः।**

***पठनाधिगमाः***

* *काव्यम् आलपति।*
* *काव्यस्य आशयं वदति लिखति च।*
* *लघूपन्यासं सस्वरं वाचयति।*
* *उपन्यासस्य आशयं वदति।*
* *जीवनचरितं लिखति।*
* *सम्पुटनिर्माणं करोति।*
* *स्वाभाविकं संभाषणं करोति।*
* *साभिनयं संभाषणम् अवतारयति।*

षष्ठः पाठः

# विदुरवचनम्



१. चक्षुषा मनसा वाचा
कर्मणा च चतुर्विधम्।
प्रसादयति लोकं य-
स्तं लोकोऽनुप्रसीदति।।

**पदच्छेदः**

| | | |
|---|---|---|
| यस्तम् | - | यः + तम्। |
| लोकोऽनुप्रसीदति | - | लोकः + अनुप्रसीदति। |

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| चक्षुषा | - | नेत्रेण |
| मनसा | - | चेतसा |
| वाचा | - | वचनेन |
| कर्मणा च | - | प्रवृत्या च |
| चतुर्विधम् | - | चतुष्प्रकारं |
| यः | - | यः नरः |
| लोकम् | - | जनम् |
| प्रसादयति | - | सन्तोषयति |
| तम् | - | तं नरं |
| लोकः | - | जनः |
| अनुप्रसीदति | - | अनुतोषयति। |

**आशयः-** नयनेन हृदयेन वाण्या प्रवर्तनेन च चतुर्धा यः नरः जनान् तोषयति तं नरं जनः अनुतोषयति।

२. यस्य कृत्यं न विघ्नन्ति

शीतमुष्णं भयं रतिः।

समृद्धिरसमृद्धिर्वा

स वै पण्डित उच्यते।।

**पदच्छेदः**

| | | |
|---|---|---|
| समृद्धिरसमृद्धिर्वा | - | समृद्धिः + असमृद्धिः + वा। |
| पण्डित उच्यते | - | पण्डितः + उच्यते। |
| **अन्वयः** | | **अर्थः** |
| यस्य | - | यस्य नरस्य |
| कृत्यम् | - | प्रवृत्तिम् |
| शीतं | - | शैत्यम् |
| उष्णम् | - | तापः |
| भयं | - | भीतिः |
| रतिः | - | लौकिकविषयेषु आसक्तिः |
| समृद्धिः | - | ऐश्वर्यम् |
| असमृद्धिः वा | - | अनैश्वर्यं वा |
| न विघ्नन्ति | - | विघ्नकारकाणि न भवन्ति |
| स वै | - | सः (नरः) एव |
| पण्डितः | - | बुधः |
| उच्यते | - | कथ्यते। |

**आशयः**- यस्य नरस्य प्रवर्तनं शैत्यं तापः भयं लौकिकविषयेषु आसक्तिः संपत् दारिद्र्यं वा न विघ्नकारकाणि भवन्ति स एव पण्डितः कथ्यते।

**३. नाप्राप्यमभिवाञ्छन्ति**
**नष्टं नेच्छन्ति शोचितुम्।**
**आपत्सु च न मुह्यन्ति**
**नराः पण्डितबुद्धयः।।**

**पदच्छेदः**

| | | |
|---|---|---|
| नेच्छन्ति | - | न + इच्छन्ति। |

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| (ये) नराः | - | ये मनुजाः |
| अप्राप्यम् | - | प्राप्तुम् असाध्यम् |
| न अभिवाञ्छन्ति | - | न इच्छन्ति |
| नष्टम् | - | विगतं प्रति |
| शोचितुम् | - | दुःखितुम् |
| न इच्छन्ति | - | न अभिलषन्ति |
| आपत्सु च | - | विपत्तिषु च |
| न मुह्यन्ति | - | मोहं न प्राप्नुवन्ति |
| ते पण्डितबुद्धयः (उच्यन्ते) | - | ते (मनुजाः) धीमन्तः इति कथ्यन्ते |

**आशयः**- ये नरा अप्राप्यं नेच्छन्ति, नष्टे विषये विपत्तिषु च दुःखं न प्रकटयन्ति तादृशाः मानवाः एव धीमन्तः भवन्ति।

४.  अमित्रं कुरुते मित्रम्

मित्रं द्वेष्टि हिनस्ति च

कर्म चारभते दुष्टं

तमाहुर्मूढचेतसम्।।

**पदच्छेदः-**

| | | |
|---|---|---|
| चारभते | - | च + आरभते |
| तमाहुः | - | तम् + आहुः |

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| (यः) अमित्रम् | - | यः मित्राय अयोग्यं |
| मित्रं कुरुते | - | सुहृदं गणयति |
| (यः) मित्रं द्वेष्टि | - | वयस्यं प्रति द्वेषं प्रकटयति |
| हिनस्ति च | - | निन्दति च |
| दुष्टं कर्म च | - | दुष्कर्म च |
| आरभते | - | प्रारभते |
| तम् | - | तादृशं नरं |
| मूढचेतसम् | - | कुबुद्धिं |
| आहुः | - | कथयन्ति। |

आशयः- मानवः दुर्जनं मित्रं गणयति मित्रं निन्दति दुष्कर्म प्रारभते च तं नरं जनाः मूढचेतसं कथयन्ति।

५.  **अनाहूतः प्रविशति**

**अपृष्टो बहुभाषते।**

**विश्वसत्यप्रमत्तेषु**

**मूढचेताः नराधमः।।**

**पदच्छेदः**

अपृष्टो बहु भाषते - अपृष्टः + बहु भाषते।
विश्वसत्यप्रमत्तेषु - विश्वसति + अप्रमत्तेषु।

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| (यः) अनाहूतः | - | (यः) आमन्त्रणं विना |
| प्रविशति | - | आविशति |
| अपृष्टः | - | प्रश्नं विना |
| बहुभाषते | - | अधिकं वदति |
| अप्रमत्तेषु | - | अधिकप्रमत्तेषु |
| विश्वसति | - | विश्वासम् अर्पयति |
| स नराधमः | - | स मनुष्याधमः |
| मूढचेताः | - | मन्दबुद्धिः (भवति)। |

आशयः- यः नरः आमन्त्रणं विना प्रविशति, प्रश्नान् विना अधिकं वदति, अधिकप्रमत्तेषु विश्वासमर्पयति तादृशः नीचमनुष्यः मन्दबुद्धिः भवति।

## पठनप्रवर्तनानि



**श्लोकान् सतालम् आलपतु।**

*श्रद्धेयाः अंशाः*	अक्षरस्फुटता।
उचितसथाने  यतिः।
आशयव्यक्तता।



**अर्थमवगम्य सरलवाक्येन श्लोकस्य आशयं लिखतु।**

*श्रद्धेयाः अंशाः*	उचितपदावली ।
श्लोकानाम् आशय :।
क्रमीकरणम्।



**(अधः प्रदत्तान् स्वभावविशेषान् वर्गीकृत्य पट्टिकायां योजयतु।)**

क.	अनाहूतः प्रविशति।
ख.	नष्टेषु न अनुशोचति।
ग.	दुष्टं कर्म करोति।
घ.	आपत्सु न मुह्यति।
ङ	अमित्रं मित्रं कुरुते।
च.	निर्भयः सन् कर्म करोति।
छ.	मित्रं द्वेष्टि।

| मूढः | पण्डितः |
|---|---|
| | |
| | |
| | |
| | |

*श्रद्धेयाः अंशाः*	उचितं वर्गीकरणम् ।
पट्टिकाकरणम् ।
आशयावगमनम् ।

सप्तमः पाठः


# शास्त्रोपासकः अच्युतप्पिषारटिः




विद्वज्जनसेवया शास्त्राध्ययनेन अध्यापनेन च प्रसिद्धः केरलीयपण्डितः आसीत् अच्युतप्पिषारटिमहाशयः। अस्य जीवनकालः षोडशशताब्दः। सोऽयं संस्कृतपण्डितेषु प्रामाणिकः आसीत्। मलप्पुरं जिल्लायाः तिरूरस्थे तृक्कण्टियूर् पिषारद्भवने पञ्चचत्वारिंशदुत्तरपञ्चदशशततमे (१५४५) वर्षे अयं भूजातः। बाल्य एव अच्युतः व्याकरणादिषु वेदाङ्गेषु वैद्यशास्त्रे च पाण्डित्यं प्राप्तवान्। ज्योतिषं गणितं च तस्य इष्टविषयौ आस्ताम्। गोलदीपिका, जातकाभरणम्, स्फुटनिर्णयः, करणोत्तमः, प्रवेशकः इत्यादयः तस्य प्रशस्ताः रचनाः।


व्याकरणशास्त्राध्ययने नारायणभट्टपादः अच्युतप्पिषारटिमहोदयस्य शिष्यत्वं स्वीचकार। स्वजीवनं सम्पूर्णं वागुपासनाय समर्पितोऽयं मनीषी एकविंशत्युत्तरषोडशशततमे (१६२१) वर्षे दिवङ्गतोऽभवत्। यद्यपि पण्डितोऽयं इह जगति अद्य न वर्तते तथापि अस्य यशः शाश्वतं स्थास्यत्येव॥

# पठनप्रवर्तनानि



**पाठभागम् उच्चैः वाचयतु।**

*श्रद्धेयाः अंशाः-* आशयावबोधः।
उचितस्थाने यतिः।
उच्चारणस्पष्टता।



**पाठभागं पठित्वा यावच्छक्यं प्रश्नान् निर्माय प्रश्नोत्तरकेलिं प्रचालयतु।**

*श्रद्धेयाः अंशाः-* प्रश्नवाचकशब्दानामुपयोगः।

आशयबन्धिता।

समग्रता

(किं, कुत्र, कति, कदा, कुतः, कथं, किमर्थम्)



**अधिकवाचनांशं पठित्वा उदाहरणानुसारं संख्याम् अक्षरैः लिखतु।**

| | | |
|---|---|---|
| उदा- १९५० | - | पञ्चाशदधिकनवशतोत्तरसहस्रम्। |
| २०१५ | - | पञ्चदशोत्तरद्विसहस्रम्। |
| १९४० | - | चत्वारिंशदधिकनवशतोत्तरसहस्रम्। |
| १८५७ | - | |
| १२० | - | |
| १८० | - | |
| १९४७ | - | |
| १९५६ | - | |



**उदाहरणं दृष्ट्वा यद्यपि - तथापि इति प्रयोगम् अवगम्य वाक्यानि परिवर्त्य लिखतु।**

उदा- मोहनः पठने असमर्थः।

मोहनः चतुरङ्गक्रीडायां समर्थः अस्ति।

यद्यपि मोहनः पठने असमर्थः तथापि चतुरङ्गक्रीडायां समर्थः अस्ति।

गीता सङ्गीतं न पठितवती।

गीता सम्यक् गायति।

..............................

आकाशे श्याममेघाः सन्ति।

श्याममेघाः न वर्षन्ति ।

..................................

गोपालः दरिद्रः अस्ति।

गोपालः दानं करोति।

..............................



**कोष्ठकात् समुचितपदानि चित्वा जीवनचरितं रचयतु।**

श्रीनारायणभट्टः

........... (१५६०) तमे वर्षे पोन्नानी जनपदे मेल्पुत्तूर् गृहे श्रीनारायणभट्टः............। अस्य .......... मातृदत्तः......... पय्यूर् भवनस्था चास्ताम्। सः महाशयः संस्कृतभाषायां

.......... आसीत्। नारायणीयम्, प्रक्रियासर्वस्वम्, धातुकाव्यम् चेति ........... अनेन विरचिताः सन्ति। अनवद्यैः अनेकैः ग्रन्थैः गैर्वाणीम् आराधितवानयं .......... (१६५०) तमे वर्षे...............।
(पञ्चाशदधिकषड्शतोत्तरसहस्र, षष्ठ्यधिकपञ्चशतोत्तरसहस्र, माता, पिता, ग्रन्थाः, दिवंगतः, जनिमलभत, पण्डितः)

श्रद्धेयः अंशः - पदानाम् अनुयोज्यता।

**वेदाङ्गानि**

| | | | |
|---|---|---|---|
| १. | शिक्षा | २. | कल्पः |
| ३. | व्याकरणम् | ४. | निरुक्तम्। |
| ५. | ज्योतिषम् | ६. | छन्दः। |


छन्दः पादौ तु वेदस्य
हस्तौ कल्पोऽथ पठ्यते।
ज्योतिषामयनं चक्षुः
निरुक्तं श्रोत्रमुच्यते।
शिक्षा घ्राणं तु वेदस्य
मुखं व्याकरणं स्मृतम्
तस्मात् साङ्गमधीत्यैव
ब्रह्मलोके महीयते।।

## संस्कृतसंख्या

| | |
|---|---|
| १. | एकम् |
| २. | द्वे |
| ३. | त्रीणि |
| ४. | चत्वारि |
| ५. | पञ्च |
| ६. | षट् |
| ७. | सप्त |
| ८. | अष्ट |
| ९. | नव |
| १० | दश |
| ११ | एकादश |
| १२. | द्वादश |
| १३. | त्रयोदश |
| १४. | चतुर्दश |
| १५. | पञ्चदश |
| १६. | षोडश |
| १७. | सप्तदश |
| १८. | अष्टादश |
| १९. | नवदश (एकोनविंशतिः) |
| २०. | विंशतिः |
| २१. | एकविंशतिः |
| २२. | द्वाविंशतिः |
| २३. | त्रयोविंशतिः |
| २४. | चतुर्विंशतिः |
| २५. | पञ्चविंशतिः |
| २६. | षड्विंशतिः |
| २७. | सप्तविंशतिः |
| २८. | अष्टाविंशतिः |
| २९. | नवविंशतिः (एकोनत्रिंशत्) |
| ३०. | त्रिंशत् |
| ३१. | एकत्रिंशत् |
| ३२. | द्वात्रिंशत् |
| ३३. | त्रयस्त्रिंशत् |
| ३४. | चतुस्त्रिंशत् |
| ३५. | पञ्चत्रिंशत् |
| ३६. | षड्त्रिंशत् |
| ३७. | सप्तत्रिंशत् |
| ३८. | अष्टात्रिंशत् |
| ३९. | नवत्रिंशत् (एकोनचत्वारिंशत्) |
| ४०. | चत्वारिंशत् |
| ४१. | एकचत्वारिंशत् |
| ४२. | द्वाचत्वारिंशत् |
| ४३. | त्रिचत्वारिंशत् |
| ४४. | चतुश्चत्वारिंशत् |
| ४५. | पञ्चचत्वारिंशत् |
| ४६. | षट्चत्वारिंशत् |
| ४७. | सप्तचत्वारिंशत् |
| ४८. | अष्टाचत्वारिंशत् |

| | | | |
|---|---|---|---|
| ४९. | नवचत्वारिंशत् (एकोनपञ्चाशत्) | ७५. | पञ्चसप्ततिः |
| ५०. | पञ्चाशत्। | ७६. | षट्सप्ततिः |
| ५१. | एकपञ्चाशत् | ७७. | सप्तसप्ततिः |
| ५२. | द्वापञ्चाशत् | ७८. | अष्टासप्ततिः |
| ५३. | त्रिपञ्चाशत् | ७९. | नवसप्ततिः (एकोनशीतिः) |
| ५४. | चतुष्पञ्चाशत् | ८० | अशीतिः |
| ५५. | पञ्चपञ्चाशत् | ८१. | एकाशीतिः |
| ५६. | षट्पञ्चाशत् | ८२. | द्वयशीतिः |
| ५७. | सप्तपञ्चाशत् | ८३. | त्र्यशीतिः |
| ५८. | अष्टापञ्चाशत् | ८४. | चतुरशीतिः |
| ५९. | नवपञ्चाशत् (एकोनषष्ठिः) | ८५. | पञ्चाशीतिः |
| ६०. | षष्ठिः | ८६. | षडशीतिः |
| ६१. | एकषष्ठिः | ८७. | सप्ताशीतिः |
| ६२. | द्वाषष्ठिः | ८८ | अष्टाशीतिः |
| ६३. | त्रिषष्ठिः | ८९. | नवाशीतिः (एकोनशतम्) |
| ६४. | चतुष्षष्ठिः | ९०. | नवतिः |
| ६५. | पञ्चषष्ठिः | ९१. | एकनवतिः |
| ६६. | षट्षष्ठिः | ९२. | द्वानवतिः |
| ६७. | सप्तषष्ठिः | ९३. | त्रिणवतिः |
| ६८. | अष्टाषष्ठिः | ९४. | चतुर्णवतिः |
| ६९. | नवषष्ठिः (एकोनसप्ततिः) | ९५. | पञ्चनवतिः |
| ७०. | सप्ततिः | ९६. | षण्णवतिः |
| ७१. | एकसप्ततिः | ९७. | सप्तनवतिः |
| ७२. | द्वासप्ततिः | ९८. | अष्टानवतिः |
| ७३. | त्रिसप्ततिः | ९९. | नवनवतिः |
| ७४. | चतुस्सप्ततिः | १००. | शतम्। |

## अष्टमः पाठः




(अध्यापिका कक्ष्यां प्रविशति)

छात्राः - (उत्थाय)नमस्ते। सुप्रभातं महोदये!

अध्यापिका - सुप्रभातम्। उपविशन्तु।

(अध्यापिका पठनयात्राम् अधिकृत्य वदति)



रविता - श्रीमति! कुत्र गच्छामो वयम्?

अध्यापिका - गतवर्षे प्रचलितां पठनयात्रां स्मरन्ति किल। अस्मिन् वर्षे अनन्तपुरीं कन्याकुमारीं च गच्छामः।

साबिरा - अनन्तपुरी केरलस्य राजधानी खलु। नियमसभामन्दिरं , मृगशाला, पुरावस्तुकेन्द्रं च तत्र सन्तीति अहं जानामि।



अध्यापिका - सत्यमेव, शिल्पसम्पन्नं श्रीपद्मनाभस्वामिमन्दिरं कोवलं समुद्रतटः च तत्रैव अस्ति।

बिजोय् - कति दिनात्मिका यात्रा?

अध्यापिका - दिनद्वयस्य। प्रथमदिने राजनगरीं , कोवलं च दृष्ट्वा रात्रा वासभोजनादिकं कन्याकुमार्यां कुर्मः।



सुमेशः - कन्याकुमारी भारतस्य दक्षिणसीमा इति वयं जानीमः।

अध्यापिका - साधु साधु। तत्र सागरसंगमो विवेकानन्दस्मृतिमण्डपः च वर्तते। तत्रापि गच्छामः।



बिजोय् - कदा गच्छामः ? महोदये!

अध्यापिका - जनुवरिमासे द्वितीयसप्ताहे।

छात्राः - (मिलित्वा सोत्साहं ) हा! हा! सर्वे वयं स्मः।



अध्यापिका - अस्तु, श्वः एव पञ्जीकुर्वन्तु।

**पदच्छेदः-**

| | | |
|---|---|---|
| तत्रापि | - | तत्र + अपि। |
| तत्रैव | - | तत्र + एव। |
| सन्तीति | - | सन्ति + इति। |
| गच्छामो वयम् | - | गच्छामः + वयम्। |

**विग्रहः-**

सोत्साहं- उत्साहेन सह वर्तते इति।

## पठनप्रवर्तनानि



### पाठभागात् आचारोपचारशब्दान् चित्वा लिखतु।

*श्रद्धेयौ अंशौ-* आशयावगमनम्।

अनुयोज्यता।



### कोष्ठकात् पदानि चित्वा सम्भाषणं पूरयतु।

(कन्याकुमारीं प्राप्ताः छात्राः तत्रस्थं एकम् आपणं प्रविश्य आपणिकेन सह भाषन्ते ।)

छात्राः - नमस्ते।

आपणिकः - नमस्ते। आगच्छन्तु ........... आवश्यकम्?

सुनिता - कङ्कणं......... । मूल्यं किम्?

आपणिकः - विंशति रूप्यकाणि।

निला - अस्तु । स्वामिविवेकानन्दस्य चित्रं विद्यते वा?

आपणिकः - आम् । तत् ........विद्यते।

निला - कति रुप्यकाणि ?

आपणिकः - दश ..........।

मुहम्मदः - मह्यमपि द्वे चित्रे ददातु।

आपणिकः - आहत्य ......... चित्राणि ।

निला - त्रीणि चित्राणि ।

आपणिकः - आहत्य ..........रुप्यकाणि ददातु।

छात्राः - स्वीकरोतु रुप्यकाणि।

आपणिकः - धन्यवादः।

(किम्, चित्रं, आवश्यकम्, रुप्यकाणि , पञ्चाशत्, कति, कीदृशं, मह्यं)

*श्रद्धेयः अंशः* - उचितं पदचयनम्।



**संभाषणं नाटकरूपेण वर्गे अवतारयतु।**

*श्रद्धेयाः अंशाः*- उचितः भावः।

उचितम् अवतरणम्।

उच्चारणस्पष्टता।



युष्माभिः कृतायाः यात्रायाः दृश्यानुभवमधिकृत्य लघूपन्यासं लिखतु।

*श्रद्धेयाः अंशाः* आशयव्यक्तता।

समग्रता।

भाषाशैली।

**अनुबन्धः**

अव्ययानि

मिलित्वा - क्त्वान्तमव्ययम्।

दृष्ट्वा - क्त्वान्तमव्ययम्।

अधिकृत्य - ल्यबन्तमव्ययम्।

वद् धातु परस्मैपदी लट्

| | ए.व | द्वि.व | ब.व |
|---|---|---|---|
| प्र.पु | वदति | वदतः | वदन्ति |
| म.पु | वदसि | वदथः | वदथ |
| उ.पु | वदामि | वदावः | वदामः |

अस् धातु परस्मैपदी लट्

| | ए.व | द्वि.व | ब.व |
|---|---|---|---|
| प्र.पु | अस्ति | स्तः | सन्ति |
| म.पु | असि | स्थः | स्थ |
| उ.पु | अस्मि | स्वः | स्मः |

**किमधिगतम्**

निर्देशाः- प्रवर्तनानि यथाकालं कृतानि चेत् साधुसूचकचिह्नं (√) क्रियताम्

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेशः निर्देशः | परिहारबोधनम्* (संख्यया सूचितम्) |
|---|---|---|---|---|---|
| १. | श्लोकं सतालमालपितम्। | | | | |
| २. | वर्गीकृताः स्वभावविशेषाः पट्टिकायां लिखिताः। | | | | |
| ३. | प्रश्ननिर्माणं कृतम्। | | | | |
| ४. | संख्या अक्षरैः लिखिता। | | | | |
| ५. | आचारोपचारशब्दाः लिखिताः। | | | | |
| ६. | सम्भाषणं लिखितम्। | | | | |
| ७. | नाटकावतारणं कृतम्। | | | | |

*
१. अध्यापकस्य साहाय्येन। २. सुहृदः साहाय्येन। ३. अन्येषां साहाय्येन।

# शब्दकोशः

| पदम | संस्कृतम् | कैरली | कन्नडम् | आङ्गलम् |
|---|---|---|---|---|
| अनुप्रसीदति | अनुतोषयति | തിരിച്ചു സന്തോഷിപ്പിക്കുന്നു | ಸಂತೋಷಗೊಳಿಸುತ್ತಾನೆ,ಳೆ | to make happy in return |
| अभिवाञ्छन्ति | इच्छन्ति | ആഗ്രഹിക്കുന്നു | ಇಚ್ಛಿಸುತ್ತಾರೆ | desire |
| अमित्रम् | न मित्रम् | മിത്രമല്ലാത്തവനെ | ಗೆಳೆಯನಿಲ್ಲದವನು | one who is not a friend |
| आपत्सु | विपत्तिषु | അപകടങ്ങളിൽ | ಕಷ್ಟಕಾಲದಲ್ಲಿ | in danger |
| इह | अस्मिन् लोके | ഇവിടെ | ಇಲ್ಲಿ | here in the world |
| उत्थाय | स्थित्वा | എഴുന്നേറ്റ് | ಎದ್ದು | having stood |
| उष्णम् | तप्तम् | ചൂടുള്ളത് | ಬಿಸಿ | hot |
| कर्मणा | प्रवृत्या | പ്രവൃത്തികൊണ്ട് | ಕೆಲಸದಿಂದ | by action |
| कृत्यम् | प्रवृत्तिः | പ്രവൃത്തി | ಕಾರ್ಯ ,ಕೆಲಸ | action |
| गतवर्षम् | अतीतवर्षम् | പോയവർഷം | ಕಳೆದವರ್ಷ | past year |
| चक्षुषा | नयनेन | കണ്ണ്കൊണ്ട് | ಕಣ್ಣಿನಿಂದ | with eyes |
| दक्षिणसीमा | दक्षिणपरिधिः | തെക്കേ അതിര് | ದಕ್ಷಿಣದಗಡಿ | south border |
| द्वेष्टि | कोपयति | കോപിക്കുന്നു | ದ್ವೇಷಿಸುತ್ತಾನೆ,ಳೆ | become angry |
| दिनात्मिका | दिनसम्बन्धि | ദിവസത്തെ സംബന്ധിച്ച് | ದಿನದ | about a day |
| दिवंगतः | मृत्युम् उपगतः | ദിവംഗതനായി | ಮರಣವನ್ನು ಹೊಂದಿದವನು | expired |
| प्रसादयति | सन्तोषयति | സന്തോഷിപ്പിക്കുന്നു | ಸಂತೋಷಗೊಳಿಸುತ್ತಾನೆ,ಳೆ | make happy |
| प्रामाणिकः | विदग्धः | പണ്ഡിതൻ | ಶ್ರೇಷ್ಠನು | scholar |

| | | | | |
|---|---|---|---|---|
| पुरावस्तुकेन्द्रम् | पुरावस्तुनिलयम् | പുരാവസ്തുകേന്ദ്രം | ಪ್ರಾಚ್ಯವಸ್ತುಸಂಗ್ರಹಾಲಯ | archaeological centre |
| भयम् | भीतिः | പേടി | ಹೆದರಿಕೆ | fear |
| भूजातः | जनिमलभत | ജനിച്ചു | ಜನಿಸಿದನು | born |
| मनसा | चित्तेन | മനസ്സുകൊണ്ട് | ಮನಸ್ಸಿನಿಂದ | with mind |
| मिलित्वा | मेलनं कृत्वा | മേളിച്ചിട്ട് | ಒಟ್ಟುಸೇರಿ | having joined |
| मुह्यन्ति | मोहं प्राप्नुवन्ति | മോഹിക്കുന്നു | ಮೂರ್ಛೆಗೊಳ್ಳುತ್ತಾರೆ | become unconscious |
| रतिः | लौकिकविषयेषु आसक्तिः | ലൗകികകാര്യങ്ങളിൽ താൽപര്യം | ವಿಷಯಾಸಕ್ತಿ | interest in worldly affairs |
| राजधानी | भरणकेन्द्रः | തലസ്ഥാനം | ರಾಜಧಾನಿ | capital |
| लोकम् | जनम् | ജനങ്ങളെ | ಜನರನ್ನು | people |
| वाचा | वचनेन | വാക്കുകൊണ്ട് | ಮಾತಿನಿಂದ | by word |
| विघ्नन्ति | वारयन्ति | തടസ്സപ്പെടുത്തുന്നു | ತಡೆಯೊಡ್ಡುತ್ತಾರೆ | prohibit |
| शताब्दः | वर्षशतम् | നൂറ്റാണ്ട് | ನೂರುವರ್ಷ | centuary |
| शीतम् | शैत्यम् | തണുപ്പ് | ಶೀತ | cold |
| शोचयितुं | दुःखितुं | ദുഃഖിക്കുന്നതിന് | ದುಃಖಿಸಲು | to feel sorrow |
| सप्ताहम् | सप्तवासराः | ഒരാഴ്ച | ವಾರ | one week |
| समर्पितः | अर्पितः | സമർപ്പിച്ചവൻ | ಸಮರ್ಪಿಸಿದವನು | dedicated |
| समृद्धिः | ऐश्वर्यम् | ഐശ്വര്യം | ಸಮೃದ್ಧಿ | prosperity |

## चतुर्थम् एककम्

# साधुभाषितम्

कथाः सुभाषितानि च उपदेशपराणि भवन्ति। उपदेशाः प्रत्यक्षतया परोक्षतया च लभ्यन्ते। गीतासूक्तानि प्रत्यक्षोपदेशपराणि इतरे तु परोक्षोपदेशपरे च।

उपदेशान् परिचिनुमः स्वायत्तीकुर्मः!

***पठनाधिगमाः***

* *गीताश्लोकं सुभाषितानि च सतालम् आलपति।*
* *सारांशं वदति लिखति च।*
* *प्रभाषणं करोति।*
* *संभाषणं लिखति।*
* *साभिनयं कथां कथयति।*
* *कथां लिखति।*
* *आप्तवाक्यानि समाहरति।*

नवमः पाठः

# गीतामृतम्



अभयं सत्वसंशुद्धिः
    ज्ञानयोगव्यवस्थितिः।
दानं दमश्च यज्ञश्च
    स्वाध्यायस्तप आर्जवम्।।

**पदच्छेदः-**

| | | |
|---|---|---|
| दमश्च | - | दमः + च। |
| यज्ञश्च | - | यज्ञः + च। |
| स्वाध्यायस्तपः | - | स्वाध्यायः + तपः। |

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| अभयम् | - | भयरहितम् |
| सत्वसंशुद्धिः | - | मनःशुद्धिः |
| ज्ञानयोगव्यवस्थितिः | - | ज्ञाने, योगे च निष्ठा |
| दानम् | - | दानकर्म |
| दमः | - | इन्द्रियनिग्रहः |
| यज्ञः | - | यागः |
| स्वाध्यायः | - | शास्त्रपठनम् |
| तपः | - | तपश्चरणम् |
| आर्जवम् | - | शक्तिः |

**सारांशः-** हे अर्जुन! ऐश्वर्यलाभाय निर्भयत्वं मनःशुद्धिः ज्ञानयोगे निष्ठा , दानकर्म इन्द्रियसंयमः यागः शास्त्रपठनं होमः शक्तिः च स्वीकार्याणि भवन्ति।

**अहिंसा सत्यमक्रोध -**
**स्त्यागः शान्तिरपैशुनम्।**
**दया भूतेष्वलोलुप्त्वं**
**मार्दवं ह्रीरचापलम्।**

**पदच्छेदः-**

| | | |
|---|---|---|
| सत्यमक्रोधः | - | सत्यम् + अक्रोधः। |
| अक्रोधस्त्यागः | - | अक्रोधः + त्यागः। |
| शान्तिरपैशुनम् | - | शान्तिः + अपैशुनम्। |
| भूतेष्वलोलुप्त्वम् | - | भूतेषु + अलोलुप्त्वम्। |
| ह्लीरचापलम् | - | ह्लीः + अचापलम्। |

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| अहिंसा | - | हिंसानिवृत्तिः |
| सत्यम् | - | अनृतम् |
| अक्रोधः | - | क्रोधराहित्यम् |
| त्यागः | - | त्यागशीलं |
| शान्तिः | - | चित्तोपशमनम् |
| अपैशुनं | - | परदूषणनिवृत्तिः |
| भूतेषु दया | - | जीविषु कारुण्यम् |
| अलोलुप्त्वम् | - | लोभाभावः |
| मार्दवं | - | मृदुलता |
| ह्लीः | - | लज्जा |
| अचापलम् | - | चपलताराहित्यम् |

**सारांशः-**

हे भारत! ऐश्वर्यलाभाय अहिंसा सत्यं क्रोधराहित्यं त्यागः समाधानं परदूषणानिवृत्तिः भूतेषु कारुण्यं लोभाभावः मृदुलता लज्जा अचञ्चलता च स्वीकार्याणि।

**तेजः क्षमा धृतिः शौच-**
**मद्रोहो नातिमानिता।**
**भवन्ति संपदं दैवी-**
**मभिजातस्य भारत।**

**पदच्छेदः-**

नातिमानिता - न + अतिमानिता।
शौचमद्रोहः - शौचम् + अद्रोहः।
दैवीमभिजातस्य- दैवीम् + अभिजातस्य।

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| हे भारत! | - | हे अर्जुन । |
| देवीं | - | दैविकं |
| सम्पदं | - | ऐश्वर्यं |
| तेजः | - | तेजो गुणः |
| क्षमा | - | सहनशक्तिः |

| | | |
|---|---|---|
| धृतिः | - | धैर्यम् |
| शौचम् | - | शुचित्वम् |
| अद्रोहः | - | द्रोहनिवृत्तिः |
| नातिमानिता | - | अहङ्कारनिवृत्तिः च |
| भवन्ति | - | आवश्यकानि भवन्ति। |

**सारांशः-** हे अर्जुन! दैविकम् ऐश्वर्यलाभाय तेजः क्षमा, सहनशक्तिः, धैर्यं, शुचित्वं, परोपद्रवनिवृत्तिः, निरहङ्कारत्वं च आवश्यकानि भवन्ति।

**दम्भो दर्पोऽभिमानश्च**
**क्रोधः पारुष्यमेव च।**
**अज्ञानं चाभिजातस्य**
**पार्थ संपदमासुरीम्।।**

**पदच्छेदः-**

| | | |
|---|---|---|
| दर्पोऽभिमानश्च | - | दर्पः + अभिमानः+ च। |
| पारुष्यमेव | - | पारुष्यम् + एव। |
| चाभिजातस्य | - | च + अभिजातस्य। |
| संपदमासुरीम् | - | संपदम् + आसुरीम्। |

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| हे पार्थ ! | - | हे अर्जुन! |

| | | |
|---|---|---|
| दम्भः | - | आत्मप्रशंसा |
| दर्पः | - | अहङ्कारः |
| अभिमानः | - | अतिमानः |
| क्रोधः | - | रोषः |
| पारुष्यम् | - | काठिन्यम् |
| अज्ञानं च | - | ज्ञानराहित्यञ्च |
| अभिजातस्य | - | सत्कुले जातस्य |
| आसुरीम् | - | असुरसंबन्धिनीम् |
| संपदम् एव | - | स्वभाववैशिष्ट्यमेव। |

**सारांशः-**

हे अर्जुन! आत्मप्रशंसा अहङ्कारः अभिमानः क्रोधः परुषवचनम् अज्ञानं च आसुरीसंपदा जातस्य स्वभाववैशिष्ट्यः एव।।

**दैवीसंपद्विमोक्षाय**
**निबन्धायासुरी मता।**
**मा शुचः संपदं दैवी-**
**मभिजातोऽसि पाण्डव।।**

**पदच्छेदः-**

| | | |
|---|---|---|
| निबन्धायासुरी | - | निबन्धाय + आसुरी। |
| दैवीमभिजातोऽसि | - | दैवीम् + अभिजातः + असि। |

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| हे पाण्डव! | | हे अर्जुन! |
| दैवीसंपत् | - | दैविकसंपत् |
| विमोक्षाय | - | संसारबन्धात् मोचनाय |
| आसुरी(संपद्) | - | आसुरी संपत् |
| निबन्धाय | - | लौकिकतृष्णावर्धनाय |
| (इति) मता | - | इति उक्ता |
| त्वं | - | भवान् |
| दैवीमभिजातोऽसि | - | दैविकांशेन जातः असि |
| मा शुचः | - | शोकेन मा। |

**सारांशः-** हे अर्जुन! दैविकसम्पत् संसारबन्धनात् विमोचनाय भवति। आसुरी सम्पत् तु लौकिकतृष्णावर्धनाय च भवति इति बुधाः वदन्ति। भवान् दैविकांशेन जातोऽसि। अतः शोकस्य आवश्यकता नास्ति। शोकमुपेक्ष्य युद्धाय सज्जो भव इति आशयः।

## पठनप्रवर्तनानि



### श्लोकं सतालमालपतु।

*श्रद्धेयाः अंशाः-* उचिततालस्वीकारः।
अक्षरस्फुटता।
आशयावबोधः।



### पाठभागाद् गुणान् चित्वा पट्टिकायां योजयतु।

| देवीगुणाः | आसुरीगुणाः |
|---|---|
| | |
| | |

*श्रद्धेयौ अंशौ-* निरीक्षणपाटवम्।
आशयग्रहणम्।



### कक्ष्यायाम् उत्तमगुणानधिकृत्य प्रभाषणं करोतु।

श्रद्धेयाः अंशाः- उचितः भावः।
स्पष्टोच्चारणम्।
आशयव्यक्तता।

दशमः पाठः

# सिंहः सिंह एव



दण्डकारण्ये कश्चन सिंहः सकुटुम्बं निवसति स्म। एकदा वने सञ्चरन् सिंहः निरालम्बं जम्बूकशिशुम् अपश्यत्। सः तं वात्सल्येन स्ववासस्थानम् अनयत्। एवं सिंहपुत्राभ्यां सार्धं जम्बूकशिशुः अवर्धत।

कदाचित् ते शिशवः वने चरन्ति स्म। अकस्मात् कश्चित् गजः तेन मार्गेण आगतवान्। झटिति सिंहपुत्रौ गजम् आक्रमितुम् उद्यतौ। "अहो एषः शक्तः। धावामः




शीघ्रम्'' इत्युक्त्वा जम्बूकशिशुः पलायनम् अकरोत्। सः सिंहीम् उपगम्य अवदत्- ''अम्ब! ज्येष्ठौ कमपि गजम् आक्रमतः, शीघ्रं तौ निवारय। नो चेत् गजः हनिष्यति'' इति।

सिंही सस्मितं प्रत्यवदत्- ''पुत्र! अलं भयेन। तौ सिंहपुत्रौ। त्वं वस्तुतः जम्बुकपुत्रः एव। त्वां मत्पुत्रवत् अपालयम्। तव कुले जाताः गजं मारयितुम् अशक्ताः। भवतः भयं कुलजस्वभावः'' इति। एतत् श्रुत्वा लज्जितः जम्बूकः ततोऽधावत्।



सहयोगेन नैकस्य स्वभावं कर्तुमन्यथा।

# पठनप्रवर्तनानि



## पाठभागं सस्वरं वाचयतु।

*श्रद्धेयौ अंशौ-* आशयग्रहणम् ।

स्पष्टतया वाचनम् ।



## समानार्थकपदानि योजयतु।

साकं, निराश्रयः, समीपं गत्वा, अरक्षत्, शृगालः

| | |
|---|---|
| निरालम्बः | निराश्रयः |
| जम्बूकः | . . . . . . . . . . . |
| सार्धं | . . . . . . . . . . . |
| झटिति | . . . . . . . . . . . |
| उपगम्य | . . . . . . . . . . . |
| अयापयत् | . . . . . . . . . . . |

श्रद्धेयौ अंशौ- उचितक्रमीकरणम्।

अर्थज्ञानम्।



**उदाहरणानुसारं पाठभागात् एकपदानि चित्वा लिखतु।**

कुटुम्बेन सह - सकुटुम्बम्।
आलम्बरहितम् - .............।
जम्बूकस्य शिशुम् - .............।
स्वकीयं वासस्थानम् - .............।
सिंहस्य पुत्रः - .............।



**सिंहिनः जम्बूकशिशोः च संभाषणम् उचितानि पदानि उपयुज्य पूरयतु।**

| | | |
|---|---|---|
| सिंही | : | पुत्र! तिष्ठ, तिष्ठ ........... किमर्थम्? |
| जम्बुकशिशुः | : | (दीर्घं निश्वस्य) तत्र एको ......... । |
| सिंही | : | अतः ........ ? |
| जम्बुकः | : | ज्येष्ठौ ......... समीपं गतौ। |
| सिंही | : | ततः किम्? तौ पुत्रौ। तयोः गजं प्रति...... नास्ति। |
| जम्बुकः | : | तौ शिशू खलु। अतः मम ..........। |
| सिंही | : | भयेन अलम्। त्वं गच्छ। |

**(तस्य, गजः, किं, धावनं , सन्देहः, भयं)**

**पदच्छेदः-**

इत्युक्त्वा - इति +उक्त्वा।
प्रत्यवदत् - प्रति +अवदत्।

| | | |
|---|---|---|
| ततोऽधावत् | - | ततः +अधावत्। |
| नैकस्य | - | न + एकस्य। |
| कर्तुमन्यथा | - | कर्तुम् +अन्यथा। |

**धातुपरिचयः**

अनयत् - णीञ् (प्रापणे) धातोः प.प लङ् ।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम. पु | अनयत् | अनयताम् | अनयन् |
| मध्यम .पु | अनयः | अनयतम् | अनयत |
| उत्तम .पु | अनयम् | अनयावः | अनयामः |

**अनुबन्धाः**

अव्ययानि- उपगम्य, गत्वा, श्रुत्वा

उपगम्य- समीपं गत्वा

शिष्यः गुरुमुपगम्य सन्देहं पृच्छति।

गत्वा- गमनं कृत्वा

बिजुः विद्यालयं गत्वा संस्कृतं पठति।

श्रुत्वा- निशम्य

श्रीकृष्णस्य वेणुगानं श्रुत्वा चराचराः सन्तुष्टाः अभवन्।

अवर्धत- वृध् वर्धने धातोः आत्म लङ्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम.पु | अवर्धत | अवर्धेताम् | अवर्धन्त |
| मध्यम.पु | अवर्धथाः | अवर्धेथाम् | अवर्धध्वम् |
| उत्तम.पु | अवर्धे | अवर्धावहि | अवर्धामहि |

एकादशः पाठः

# सुभाषितानि




१. क्षमा बलमशक्तानां

शक्तानां भूषणं क्षमा।

क्षमा वशीकृतिर्लोके

क्षमया किं न सिद्ध्यति।।

२. इन्द्रियाणि च संयम्य
बकवत् पण्डितो नरः।
देशकालबलं ज्ञात्वा
सर्वकार्याणि साधयेत्।।

३. अरक्षितं तिष्ठति दैवरक्षितं
सुरक्षितं दैवहतं विनश्यति।
जीवत्यनाथोऽपि वने विसर्जितः
कृतप्रयत्नोऽपि गृहे न जीवति।।

**पदच्छेदः-**

| | | |
|---|---|---|
| बलमशक्तानाम् | - | बलम् + अशक्तानाम्। |
| वशीकृतिर्लोके | - | वशीकृतिः + लोके। |

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| अशक्तानाम् | - | शक्तिहीनानाम् |
| बलम् | - | शक्तिः |
| क्षमा (एव) | - | क्षमा |

| | | |
|---|---|---|
| शक्तानाम् | - | बलशालिनाम् |
| भूषणम् | - | अलङ्कारः |
| लोके | - | अस्मिन् लोके |
| क्षमा | - | क्षमाशीलम् |
| वशीकृतिः | - | स्वायत्तीकर्तुं समर्था |
| क्षमता | - | क्षमया |
| किं न सिद्ध्यति | - | किं न साध्यते |

**आशयः**

क्षमा शक्तिहीनानां शक्तिः शक्तानाम् अलङ्कारः च भवति। लोके सर्वं स्वायत्तीकर्तुं समर्था एव क्षमा। क्षमया किं न साध्यते सर्वं साधयितुं शक्यम् इति भावः।

२. **अन्वयः** **अर्थः**

| | | |
|---|---|---|
| पण्डितः नरः | - | ज्ञानी पुरुषः |
| इन्द्रियाणि | - | सर्वाणि इन्द्रियाणि च |
| संयम्य | - | नियन्त्रणं कृत्वा |
| बकवत् | - | सारस इव |
| देशकालबलं | - | देशकालानुसृतां शक्तिं |
| ज्ञात्वा | - | विज्ञाय |
| सर्वकार्याणि | - | सर्वाणि कार्याणि |
| साधयेत् | - | प्रापयेत् |

**आशयः**

ज्ञानी पुरुषः सर्वाणि इन्द्रियाणि नियम्य सारस इव देशकालानुसृतशक्तिं विज्ञाय च सर्वाणि कार्याणि प्रापयेत्।

३. **पदच्छेदः-**

जीवत्यनाथोऽपि -जीवत्यनाथः + अपि।

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| अरक्षितम् | | रक्षाहीनम् |
| दैवरक्षितं | - | दैवेन रक्षितम् |
| तिष्ठति | - | वर्तते |
| सुरक्षितं | - | सुरक्षितं पुरुषम् |
| दैवहतं | - | विधिहतेन |
| विनश्यति | - | नश्यति |
| वने | - | कानने |
| विसर्जितः | - | परित्यक्तः |
| अनाथः अपि | - | अनाथः पुरुषः अपि |
| जीवति | - | जीवनं करोति |
| गृहे | - | भवने |
| कृतप्रयत्नः अपि | - | प्रयत्नशीलः अपि |
| न जीवति | - | जीवनं न करोति। |

**आशयः**

रक्षाहीनोऽपि पुरुषः दैवेन रक्षितः भवति। सुरक्षितः अपि मनुष्यः विधिवैपरीत्यात् नाशं प्राप्नोति। वने सर्वैः परित्यक्तः अपि जनः जीवनं करोति। किन्तु प्रयत्नशीलस्यापि पुरुषस्य गृहे जीवनं न साध्यं भवति।

## पठनप्रवर्तनानि



**सुभाषितानि सतालमुच्चैरालपतु।**

*श्रद्धेयाः अंशाः-* अक्षरस्फुटता।
उचितः तालः।
आशयव्यक्तता।



**सुभाषितानाम् अन्वयं लिखतु।**

*श्रद्धेयौ अंशौ-* आशयावबोधः।
उचितपदचयनम्।



**पाठभागस्य आशयं स्ववाक्यैः लिखतु।**

*श्रद्धेयौ अंशौ-* उचितः भाषाप्रयोगः
आशयव्यक्तता।



### सुभाषितानि सञ्चित्य स्फोरकपत्रे विलिख्य प्रदर्शयतु।

*श्रद्धेयाः अंशाः-* सयुक्तिकं प्रतिपादनम्।

आशयावगमनम्।

आकर्षकत्वम्।

**किमधिगतम्**

निर्देशाः- प्रवर्तनानि यथाकालं कृतानि चेत् साधुसूचकचिह्नं (√) क्रियताम्

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेशः निर्देशः | परिहारबोधनम्* (संख्यया सूचितम्) |
|---|---|---|---|---|---|
| १. | सुभाषितानां आलपनम्। | | | | |
| २. | अन्वयलेखनम्। | | | | |
| ३. | आशयलेखनम्। | | | | |
| ४. | सुभाषितानां सञ्चयनम्। | | | | |
| ५. | गुणानां पट्टिकाकरणम्। | | | | |
| ६. | प्रभाषणम्। | | | | |

*
१. अध्यापकस्य साहाय्येन। २. सुहृदः साहाय्येन। ३. अन्येषां साहाय्येन।

# शब्दकोशः

| पदम् | संस्कृतम् | कैरली | कन्नडम् | आङगलम् |
|---|---|---|---|---|
| अकस्मात् | यदृच्छया | യാദൃശ്ചികമായി | ಆಕಸ್ಮಿಕವಾಗಿ | accidently |
| अगमयत् | नीतवान् | നയിച്ചു | ಕಳುಹಿಸಿದನು | lead |
| अपैशुनं | परदूषणनिवृत्तिः | അന്യരെ ദുഷിക്കുന്നതിൽനിന്നും പിന്തിരിയൽ | ಚಾಡಿಹೇಳದವರನ್ನು | to resist from speaking ill of others |
| अवर्धत | वर्धते स्म | വളർത്തി | ವೃದ್ಧಿಹೊಂದಿತು | brought up |
| उद्यता | यत्नं कृतौ | പരിശ്രമിച്ചു | ತೊಡಗಿದರು | tried |
| उपगम्य | समीपं गत्वा | അടുത്ത് വന്നിട്ട് | ಹತ್ತಿರಹೋಗಿ | having come nearer |
| कश्चन | एकः | ഒരുവൻ | ಯಾವನೋ ಒಬ್ಬನು | one person |
| चरन्ति | सञ्चरन्ति | സഞ്ചരിക്കുന്നു | ಮೇಯುತ್ತವೆ | travel |
| जानीतः | (युवां) जानाति | അറിയുന്നു | ತಿಳಿಯುತ್ತಾರೆ | know |
| झटिति | जवेन | പെട്ടെന്ന് | ಕೂಡಲೇ | suddenly |
| दण्डकारण्यम् | दण्डकवनं | ദണ്ഡകാരണ്യം | ದಂಡಕವನ | dandaka forest |
| दर्पः | अहङ्कारः | അഹങ്കാരം | ಅಹಂಕಾರ | Pride |
| दमः | इन्द्रियनिग्रहः | ഇന്ദ്രിയങ്ങളെ നിഗ്രഹിക്കൽ | ಇಂದ್ರಿಯನಿಗ್ರಹ | to Control the senses |
| दम्भः | कपटः | വഞ്ചന | | Fraud |

| कोल्लमासः | सौरमासः |
| --- | --- |
| चिङ्ङम् | सिंहः |
| कन्नि | कन्या |
| तुलाम् | तुला |
| वृश्चिकम् | वृश्चिकः |
| धनु | धनुः |
| मकरम् | मकरः |
| कुम्भम् | कुम्भः |
| मीनम् | मीनः |
| मेटम् | मेषः |
| इटवम् | ऋषभः |
| मिथुनम् | मिथुनम् |
| कर्कटकम् | कर्कटकः |

| मासानां संस्कृतनामानि | |
|---|---|
| चैत्रः | एप्रिल्- मैई |
| वैशाखः | मैई - जून् |
| ज्येष्ठः | जून्- जूलाई |
| आषाढः | जूलाई -आगस्त् |
| श्रावणः | आगस्त् -सेप्तंबर् |
| भाद्रपदः | सेप्तंबर् - अक्तूबर् |
| अश्विनः | अक्तूबर् - नवंबर् |
| कार्तिकः | नवंबर् - दिसंबर् |
| मार्गशीर्षः | दिसंबर् - जनुवरि |
| पौषः | जनुवरि - फब्रुवरि |
| माघः | फब्रुवरि - मार्च् |
| फाल्गुनः | मार्च् - एप्रिल् |